# दुर्गापदुद्धार स्तवराजः

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्य पादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ १॥

नमस्ते जगच्चिन्त्यमान स्वरूपे नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते नमस्ते सदानन्द रूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ २॥

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ३॥

अरण्ये रणे दारुणे शत्रुमध्ये जले सङ्कटे राजगेहे प्रवाते ।
त्वमेका गतिर्देवि निस्तार हेतुर्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ४॥

अपारे महादुस्तरेऽत्यन्त घोरे विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारनेका नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ५॥

नमश्चण्डिके चण्ड दोर्दण्ड लीला समुत्खण्डिता खण्डलाशेष शत्रोः ।
त्वमेका गतिर्विघ्न सन्दोह हर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ६॥

त्वमेका सदाराधिता सत्यवादि न्यनेकाखिला क्रोधना क्रोधनिष्ठा ।
इडा पिङ्गला त्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ७॥

नमो देवि दुर्गे शिवे भीमनादे सदासर्व सिद्धिप्रदातृ स्वरूपे ।

विभूतिः सतां कालरात्रि स्वरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ८॥

शरणमसि सुराणां सिद्ध विद्याधराणां
मुनिदनुज पशूनां व्याधिभिः पीडितानां
नृपतिगृह गतीनां दस्युभि स्त्रासितानाम् ।
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ९॥

इदं स्तोत्रं मया प्रोक्तं आपदुद्धार हेतुकम् ।
त्रिसन्ध्य मेकसन्ध्यं वा पठनाद्धोर सङ्कटात् ॥ १०॥

मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ।
सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ॥ ११॥

स सर्व दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ।
पठनादस्य देवेशि किं न सिद्ध्यति भूतले ॥ १२॥

स्तवराज मिदं देवि सङ्क्षेपा त्कथितं मया ॥ १३॥

इति श्रीसिद्धेश्वरी तन्त्रे उमामहेश्वर संवादे श्रीदुर्गापदुद्धार स्तोत्रम् ॥